No. ११२९-घ

Title महागौरीपूजापद्धतिः

Author

Extent २४ Age

Subject तन्त्रम्

महागौरीपूजा~~विधि~~पद्धतिः

११२९

१४ पत्रे

तत्रहस्तपादौप्रक्षाल्यय   द्विमास्थायतत्रोपवेश्य
आसनंशोधयेत्

ओंअस्यश्रीआसनशुद्धिमंत्रस्यमेरुपृष्ठऋ
षि:सुतलंछंद:कूर्मोदेवताआसनशुद्धे
विनियोग:१ ओंपृथिव्यैनम: ओंवसुध
रायैनम: पृथिवीत्वयाधृतालोकादेविवि
ष्णुनाधृतात्वंचधारयमांदेविपवित्रंकुरु
चासनं ॐ अं अनंतायनम: ॐ पंपद्मास
नायनम: ॐ पंपद्मनालायनम: ॐ आधार
शक्त्यैनम: ॐ कंकूर्मायनम: ॐ सहस्रदल
कर्णिकायैनम: इत्यभ्यर्च्य तत: उपविश्य
तालत्रयंकुर्यात् अपसर्पंतुयेभूतायेभू

ताभूमिसंस्थिताः येभूताविघ्नकर्तारस्तेन
श्यंतुशिवाज्ञया इतिताडनंयंयदत्वानाराच
मुद्रांप्रदर्श्ययेत् इत्यासनंशुध्यिमंत्रः इत्या
सनंसंशोध्यपूर्वस्यांदिशियज्ञवेदींमीशान्मा
त्रांविधायचतुर्हस्तविस्तृतांविश्वकृतत्रसं
म्यक्कयासंलिप्यमूलेनफट्स्वाहान्तापाशासं
बाध्यश्रीचक्रं चतुर्श्चारमष्टपत्रं षट्स्रत्रिको
णंबिंदुविराजितंसिंदूरेणयज्ञवेद्यांविभा
व्य तत्रमंमंडूकायनमः श्रीं पृथिव्यैन० सौं
सुधावर्णायनमः रंरत्नेरद्वीपायन० क्लींसौंः
सरोवरायन० क्लींकल्पवनाय० तन्मध्येपमवना 3

य॰ कल्पवल्लीमूलवर्ग्यै नमः यं योगपीठाय॰ त
त्रसंपूज्य चतुरस्रे प्रपूजयेत् ऊँ सौः क्लीं ऐं सर्वाशा
पूरकाय न॰ ऊँ इं इन्द्राय॰ ॐ धं धर्मराजाय॰ ॐ
वं वरुणाय॰ ॐ क्षीं कुबेराय॰ इति गंधाक्ष
तपुष्पैरभ्यर्च्यैव सुदलं पूजयेत् इति द्वारपा
लाः ॐ सं संहाराय न॰ कं कालरुद्राय॰ वं
विकरालाय॰ क्षीं करालाय॰ कं कालाग्नये
न॰ रूं रुद्रभैरवाय॰ सौ सुसभैरवाय॰ श्रीं उ
न्मत्तभैरवा॰ इति गंधाक्षतैरभ्यर्च्या ष्टदलं
पूजावरणं मूलं सर्वसंमोहनीय॰ इति पु
ष्पांजलिं दत्वा षद्रमर्चयेत् ॐ ह्रीं भुवनेश्व
र्यै नमः ऐं सौः बलायै न॰ ॐ क्लीं बगला

यैनः ॐ ह्रीं सौंः सरस्वत्यै नः ॐ सः घ्रीं घ्रिंं नमस्तायै नः ॐ श्रीं ह्रीं पद्मावत्यै नः इति गंधा
क्षतपुष्पैरभ्यर्च्य संपूज्य षट्कोणावरणं ॐ
गंगायै नः ईशान्ये ॐ यं यमुनायै नः आग्नेये
ॐ सौंः सरस्वत्यै नः अथ त्रिकोणावरणं मू इति
लं दुर्गायै नमो विं ह्रौं मूलं शिवाय मूलं दुर्गा
भ्यां नः इति संपूज्य गंधाक्षतपुष्पदीपधूप
नैवेद्य तांबूलछत्रचामरराचिकादिभिर
भ्यर्च्य तत्र मूलं फ लं फट् स्वाय फट् स्वाहान्ता
दिग्बंधनं विधाय तत्र विदिक्षु यन्त्र वेद्यां बा
णान् संस्थाप्य मूलेन यथापात्रं सप्तधाभिमंत्र्य 2

श्री च क्रोपरि ॐ हूं फट् स्वाहेति वापयेत् तत्र श्री दे
वीं ध्यात्वा मूलमुच्चार्य घटं नूतनमछिद्रं दिव्यमा
ल्यानुभूषितं सौवर्णैरञ्जितं ताम्रं मृन्मयं चेति वि
श्रुतं तत्र श्री घटं माल्यं कुरे धत्वा श्री घंटा शंख
रवेना न्नाआपूर्य श्री ॐ ह्रीं श्रीं दुर्गायै नमः इति
मूलेन सप्तधोच्चार्य श्री फट् स्वाहेति विंदो घटं
समर्पयेत् तत्र श्री तीर्थजलमानीय ॐ नवदुर्गाभ्यो
नमः घटं मंबुनापूर्य पूजयेत् मूलं दुर्गायै नमः
इति याग वस्तूनि संशोध्य ॐ इंद्राय नः घटस्य ३
पूर्वे गं गणेशाय नः घटस्य पुरस्तात् ॐ वं वरुणा
य॰ घटाधः क्षौं कुबेराय नः घटस्य वामे ॐ श्रीं

धर्मराजायन० घटस्य दक्षिणे ॐ ह्रीं ह्रौं कुबे
रायन० घटमध्ये इति गंधाक्षतपुष्पैरभ्यर्च्य घट
3 मध्ये नवदुर्गाः पूजयेत् ॐ ह्रीं श्रीं ऐं सौं सौः
ऐं श्रीं ह्रीं ॐ शैलपुत्र्यै न० १ ॐ श्रीं ह्रीं क्लीं सः ब्र
ह्मचारिणि ऐं फट् स्वाहा २ ॐ क्लीं सः श्रीं ह्रीं ऐं
सौं चंडघंटायै न० ३ ॐ श्रीं ह्रीं क्लीं कूष्मांडै
नमः ४ ॐ श्रीं ह्रीं ह्रौं स्कंदमात्रे हुं हुं फट्
स्वाहा ५ ॐ कात्यायन्यै नमः ६ ॐ श्रीं ह्रीं ह्रीं २
श्रीं ॐ कालरात्रि क्लीं ऐं सः फट् स्वाहा ७
ॐ ऐं सौः गीं हं महागौर्यै नमः ८ ॐ ऐं
क्लीं सौः श्रीं ह्रीं देवहूति श्रीं फट् ठः ठः ठः स्वा

ता एषाविद्यामहाराज्ञीनवमंत्रात्मिका
शिवे जमे होमे चैनेदेवि सिद्धिदा साधके
श्वरि कुर्याद्देवि ततोमित्रीशैलपुत्र्यास्तु
पूजनं सशांतिकरस्तत्र कुंभेपूजयत्सा
धकः शिवो ॐ अस्यश्रीशैलपुत्रीपूजामं
त्रस्य श्रीमहाकालभैरवऋषिः त्रिष्टुप्छं
दः श्रीपुत्रीदेवता ह्रींबीजं सौःशक्तिः नमो
दिग्बंधः ॐ इति कीलकं धर्मार्थकाममो
क्षार्थेकुंभपूजायांकुमारीपूजमेवाहो
मेपाठेविनियोगः तत्रादौ विधानुस्मार्य

श्रीं।

घंटा रवं मृदंग ध्वनिं विधाय पूजामारभे
5 तू ॐ गं गणपतये नमः पूर्वे सौ सरस्व
त्यै नमः दक्षिणे ॐ गंगायै न० पश्चिमे ॐ
यं यमुनायै न० उत्तरे वं बटुकाय न० ऊर्ध्वे
ॐ योगिनीभ्यो नमो ऽधः इति घटं संपूज्य
मूलं समुच्चार्य प्रणवेन प्राणायामं त्रयं विधा
य तत्त्वत्रयेणाचम्य देवीं पूजयेत्तु तत्रादौ
ॐ ह्रीं सौं देवि श्रीलपुत्रि घटेऽस्मिन् हि रहः सं 8
न्निधं कुरु कुरु ॐ श्रीं स्वाहेत्यावाह्य मूलेन
पाद्यार्घ्यादि निवेद्य तत्रासनं दत्वा पूजयेत्
१०

त्॥ ॐ ह्रीं श्रीं दुं दुर्गायै नमः ॐ ह्रीं श्रीं जयायै न॰ ॐ
ह्रीं श्रीं विजयायै न॰ ॐ ह्रीं श्रीं रत्यै नम॰ ४ ॐ ह्रीं
श्रीं प्रीत्यै न ॐ ह्रीं श्रीं कात्यै नमः स्थित्यै न॰ मूलं त्यै न॰
इति दिक्षु विदिक्षु घटस्य बाह्य मातृकार अर्च्य
मध्ये मूलं त्रिपुरायै न॰ मूलं त्रिशिखलक्ष्म्यै न॰ मू
लं सरस्वत्यै न॰ मूलं तारायै न॰ मूलं एकजटा
यै न॰ मूलं नीलसरस्वत्यै न॰ मूलं तोतुलायै
नमः॰ मूलं तारिण्यै न॰ मूलं सप्तधोच्चार्य श्रीं वै
लपुत्र्यै न॰ इति मध्ये गंधाक्षतपुष्पदीपधूप
नैवेद्याचमनीयतांबूलछत्रचामरारात्रिका
कादीन्निवेद्य कुमारीः पूजयेत् तत्र पूर्ववत्

घंटारवं विधाय देवीं ध्यायेत् उद्यद्दिनेशां
5 द्युतसन्निभाभां द्राशांकलेखामुकुटां चतुर्भु
जां रक्तां वरां मग्निरवींदुलोचनां तां शै
लपुत्रीं वरदां स्मराम्यहं इति ध्यात्वा पू
र्वाभिमुखीः कुमारीः पूजयेत् [illegible] यथा
त्क्रिञ्चस्वा ककुचादिपाठं कृत्वा ॥ तथाप
रेहनि ब्रह्मचारिणीं पूजयेत् ॥ ॐ अस्य
ब्रह्मचारिणीमंत्रस्य भैरव ऋषिः अ
नुष्टुप् छंदः श्रीब्रह्मचारिणीदुर्गा देवता
क्लीं बीजं ह्रीं शक्तिः क्लीं कीलकं सौः दि
ग्बंधनं श्रीधर्मार्थकाममोक्षार्थे पूजा

यां विनियोगः तत्र ह्रामित्ति षडंगं विधा
य तत्त्रयेणाचम्य श्रीमित्ति प्राणायामं वि
धाय घटं पूजयेत् ॐ ह्रीं विद्यां सारिण्ये
नमः इति विद्यानुसार्यंगं गणेत्वा यं
इति पूर्ववद् घटे ध्यात्वा संपूज्य देवीं पूज
येत् ॐ ह्रीं सौंः देवि ब्रह्मचारिणी सपरि
वारे घटेस्मिन्ने ह्येहि इह संनिधिं कुरु
पूजां गृहाण श्रीं ॐ स्वाहेत्यावाह्य मूले
न पाद्यार्घ्यादि निवेद्य तत्रासनं दत्वा पू
जयेत् ॐ श्रीं ह्रीं दुं दुर्गायै नमः ॐ जयायै
न० २ विजयायै न० ३ रत्यै न० ४ प्रीत्यै न० ५

कांस्यैन॰ स्थिरस्यैन॰ भूतस्यैन॰ इति दिक्षु विदिक्षु सं
पूज्य घटमध्ये मूलं वाला सरस्यैन॰ मूलं कुब्जि
कायैन॰ मूलं करालिन्यैन॰ मूलं कुसुमस्यैन॰ मूलं
मातंग्यैन॰ मूलं मनोन्मन्यैन॰ मूलं मदोत्कटायैन॰
मूलं रत्नेश्वर्यैन॰ ॐ ऐं श्रीं ह्रीं क्लीं सः ब्रह्मचारिणि ऐं
फट् स्वाहा ब्रह्मचारिण्यै नमः इति सप्तधोच्चा
र्य मध्ये गंधाक्षतादीन्निवेद्य तांबूल छत्र चामर
रात्रिकाः समर्प्य पूर्ववत् कुमारीं पूजयेत् कम
लासि वराभयायुधां शशिवक्त्रां शशिशेखरां
शिवां। अरुणाभ पूर्णां त्रिलोचनां भज ब्रह्मचारिणीं
इति ध्यात्वा कुमारीं संपूज्य घटाग्रे जपं कुर्यात्
तद्गजपं निर्वर्त्य जपांतदशांशतो होमाः इति विधि
हृदयेतां

6

नाहोमं कृत्वा आत्मन एनं संतर्प्य विसर्जयेत्
ॐ अस्याः श्रीचंडघंटापूजायाः श्रीभैरव ऋ
षिः अनुष्टुप् छंदः श्रीचंडघंटा देवता ह्रीं बीजं
सः शक्तिः श्रीं कीलकं नमो दिग्बंधनं श्रीध
र्मार्थकाममोक्षार्थे श्रीचंडघंटापूजायां विनि
योगः ऋषिमित्यादि न्यासः तत्र भूतानुत्सार्य
तत्त्वत्रयेणाचम्य आत्मतत्त्वं शोधयामि स्वाहा
ॐ शिवतत्त्वं शोधयामि स्वाहा ॐ ह्रीं शक्तितत्त्वं
शोधयामि स्वाहा इत्याचम्य प्रणवेन प्राणा
यामं विधाय घटमभ्यर्च्य बाह्ये मातृका संपू
ज्य देवीं संपूजयेत् ॐ ह्रीं सोः देवि चंडघंटे स्मि
न्नेहि २ सांनिध्यं कुरु २ पूजां गृहाण २ श्रीं ॐ स्वाहा

स्यावाह्य मूलेन पाद्यादि निवेद्य तत्रासनं दत्वा
पूजयेत् मध्ये मूलं कालायै न॰ मूलं शिवायै न॰
मूलं कामिन्यै न॰ मूलं भद्रकाल्यै न॰ मूलं श्म
शान कालिकायै न॰ मूलं कुरुकुल्लायै न॰
मूलं मोहद्यै न॰ मूलं समातन्यै ऊँ ह्रीं
सः श्रीं ह्रीं ऐं सौः चं उग्रायै नमः इति
सप्तधोच्चार्य मध्ये गंधाक्षत पुष्प धूप
दीप नैवेद्य तांबूल छत्र चामरादीन् स
मर्प्य कुमारीं पूजयेत् तत्र पूर्ववत् घं
टारवं सत्वा देवीं ध्यायेत् बालाताराशां
कापुत्तमपीव क्रां त्रिलोचनां स्मेरमुखीं

प्रसन्नां ह्रीं स्वाब्जचापामृतकुंभहस्तां
श्रीचंडिघंटां हृदये भजामि ध्यात्वा कुमा
रीरभ्यर्च्य संतर्प्य कुमारीं जपायुतं चा
दशं कुर्यात् ततः स्तोत्रादि पठित्वा हो
मं कुर्यात् मूलेन विसर्जयेत् इति
ॐ अस्य श्रीकूष्माण्डीमंत्रस्य ब्रह्मा ऋषिः अ
नुष्टुप् छंदः श्रीकूष्माण्डी देवता क्लीं बीजं ह्रीं
शक्तिः प्रणवः कीलकं नमो दिग्बंधनं धर्म
र्मार्थकाममोक्षार्थे जपे विनियोगः ऋषि
न्यासादिन्यासं कृत्वा पूर्ववदाचम्य प्राणा

यामत्रयं विधाय घटं वास्यमातृकाभिर भ्यर्च्य ॐ ह्रीं सः कूष्माण्डे एह्येहि सन्निधिकुरु कुरु एओं ग्लः ह्रीं श्रीं ॐ श्रीं स्वाहा [illegible] स्यावास्य मूलेन पाद्यादि नैवेद्य घटं बहिः संपूज्य म ध्ये पूजयेत् मूलं कामेश्वर्यै नमः मूलं फांताये नमः मूलं कूष्मोदर्यै नमः मूलं कालावस्थै नमः मूलं कालौ नमः मूलं चंद्रिन्यै नमः मूलं तंविकायै नमः मूलं परस्परायै नमः ॐ श्रीं ह्रीं क्लीं कूष्माण्डे नमः इति सप्तधोच्चार्य मध्ये तत्र गंधाक्षत पुष्प धूप दीप नैवेद्यादीं निवे

8

धकुमारिपूज्येय क्षीरपायसखंडाद्यैर्वस्त्रै
राभरणैर्जलैः दक्षिणाभिस्तावैर्देवि तोषयेत्के
यकः सुधीः इति कुमारीरभ्यर्च्य कुंभाये
मूलं जपेत् अयुतं तु जपेद्देवि तद्दशांशमहे
श्वरी अतो दशांशतो होमः कार्यः सा
धकसत्तमैः इति जपं संपाद्य कवचस
हस्रनामस्तवपाठं विधाय दशांशतो हो
मः कार्यं मार्जनं च विधाय ब्रह्मणं
पूजयित्वा संहारमुद्रया विसर्जयेत् इ
ति श्रीकूष्मांडपूजापद्धतिः ॥

ॐ अस्य श्रीस्कंदमातृमंत्रस्य श्रीभैरव ऋ
१ षिः त्रिष्टुप् छंदः श्रीस्कंदमाता देवता ह्रीं बीजं
हौं शक्तिः ह कीलकं फट् दिग्बंधः धर्मार्थका
ममोक्षार्थे विनियोगः ह्रामित्यादिन्यासः
प्रणवेन प्राणायामत्रयं कुर्यात् तत्वत्रयेणा
चम्य घंटाध्वनिं विधाय घटार्चनं कुर्यात्
घटे वास्य मातृका अभ्यर्च्य देवीं श्चावाऽभ्य
र्चयेत् तत्रादौ ॐ श्रीं ह्रीं स्कौं स्कः स्कंदमा
तर एह्येहि घटे सन्निधानं कुरु कुरु हौं हः हः
फट् स्वाहेत्यावाह्य मूलं त्रिरुच्चार्य पाद्या

द्दिनि वेद्य मूले गासनं दत्वा पूजयेद्व मध्ये
मूले स्थितैनमः मूलं पीठायेन॰ मूलं कीलैन॰ कालै
नमः मत्येन॰ मत्यो नमः उमायेन॰ हेमवत्येन॰
ॐ ह्रीं श्रीं ह्रैं स्कंदमाये हुः हुः फट् स्वाहेत्यष्टधोचा
र्य मध्ये इति गंधाक्षतपुष्पधूपदीपनैवेद्यता
बूल छत्रचामरादीन्त्संमर्प्य कुमारीपूजां कुर्या
त् तथादौ पूर्ववत्पंचखध्वनिं विधाय देवीं सशि
वां ध्यायेत् सितांशुकोटिस्फुरदास्यशोभां
त्रिलोचनां कुंकुमपीतवस्त्रां सिंहासनां नाग
मुखादियुक्तां भजेत् हदि स्कंदयुतां भवानीं ॥

इति ध्यात्वा कुमारीरभ्यर्च्य भोजनाद्याद्दना

भरणादीन्समर्प्य कुंभाग्रे यथाशक्त्या मूलं

जपेत् इति थेक कवच सहस्रनामस्तव पाठं वि

धाय होमवेदीं गत्वा दक्षांशतो होममारभे

त् ततो मूलेन होमतर्पणमार्जनभोजना

दीन्संमर्प्य देवीं विसर्जयेत् इति श्रीस्कंद

माता पूजापद्धतिः समाप्त ॐ अस्य श्री 10

कात्यायनीनि पूजामंत्रस्य सदाशिव ऋ

षिः अनुष्टुप् छंदः श्रीभवानी कात्याय

नी देवता ह्रीं बीजं ॐ शक्तिः स्वाहा कीलकं

नमो दिग्बंधनं श्रीधर्मार्थकाममोक्षार्थे
जपे विनियोगः ह्रांमित्याद्यादिन्यासः तत्व
त्रयेणाचम्य प्रणवेन प्राणायामत्रयं कृ
त्वा घटे बाह्यमातृकाः संपूज्य ह्रींकाल्या
यन्ये त्वेहि पूजां बलिं गृह्ण २ संस्थितं कुरु २
ह्रीं स्वाहेत्यावाह्य मूलेन पाद्यादिनिवेद्य
घटं बहिरभ्यर्च्य मध्ये पूजयेत् मूलं कामि
न्यै नमः कुलजायै न० कलावत्यै नमः क
नकेश्वर्यै न० कीर्तिमत्यै न० कांतिदायै न०
कौलिन्यै न० कौतुकिन्यै नमः इति संपूज्य

मध्येन्ह्रीं कात्यायिन्यै नमः इति त्रिरभ्यार्च्य
गंधाक्षतपुष्पधूपदीपनैवेद्यछत्रचामरादी
दीन्समर्प्य देवीं ध्यायेत् कुमारीं पूजयेत्
तत्रपाद्यादि दत्वा यथावदभ्यर्च्य वस्त्रालंकारा
दीन्दत्वा भोजनाद्यैः संतर्प्य देवीं ध्या
येत् चतुर्भुजां शावगतां नौमि का
त्यायनीं शिवां २ सहस्रकरदीप्तांगीं व्य
रक्षां रक्तांबरोज्वलां १ पूर्वार्धे ध्यात्वा घ
टाग्रे यथाविधी मूलं जप्त्वा देव्यग्रे कवच
सहस्रनामस्तवपाठं विधाय होमस्थ

लीमागच्छत् पूर्ववत्क्षोभं विधाय देवीं वि
सर्जयेत् इति श्रीकात्यायनीपूजापद्ध
ति समाप्तः ओं मूलमंत्रस्य श्री कालरात्री
मंत्रस्य भैरव ऋषिः अनुष्टुप् छंदः श्री
कालरात्री देवता श्रीं बीजं ह्रीं शक्तिः ऊं
कीलकं श्रीं क्लीं इति दिग्बंधनं धर्मार्थकाम
मोक्षार्थे विनियोगः श्रीं ह्रां इति न्यासः
दिग्बंधनं विधाय भूतानुत्सार्य ऊं ह्रीं वि
घ्नोत्सारिण्यै नमः इति विघ्नानुत्सार्य
पुनराचम्य प्राणायामत्रयं कृत्वा घटंस्थ

जयेत् तत्रावाह्य मातृकाः संपूज्य देवीं
सशिवां पूजयेत् ॐ श्रीं ह्रीं क्लीं देवी कालरात्रि
घटेऽस्मिन्नेहि पूजाविधिं गृहाण २ सन्निधिं कुरु २
ऐं सः स्वाहेत्यावाह्य मूलेन पाद्यार्घ्यादि
निवेद्यासनं दत्वा पूजयेत् ॐ ह्रां श्रीं कु
त्येनम॰ कुल्याद्येन॰ कुसुमाद्येन॰ कुलेश्व
र्येन॰ कुलाचाराद्येन॰ कुसवस्त्र्येन॰ कुल्ब
ज्ञाद्येन॰ कुलरूपिन्येन॰ ॐ श्रीं ह्रीं श्रीं ॐ का
लरात्रि क्लीं ऐं सः फट् स्वाहा इति सप्तधा
चार्य मध्ये इत्येवं गंधाक्षतपुष्पधूपदी

पनैवेद्यादीन्निवेद्य कुमारीः पूजयेत् त
त्रादौ घंटाशंखमृदंगरवं विधाय पादौ
प्रक्षाल्य पाद्यादिदत्वाभरणादीनिदत्वा
पायसेन संतर्प्य घटाग्रे मूलं जपेत् तत्रा
दौ देवीं ध्यायेत् नवांबुदद्योतामिनेंदुवह्नि
नेत्रां गदाभोजकराहसंती पीतांबरांशुं
ल्कचोज्वलांगीं श्रीकालरात्रिं हृदये भजा
मि इति ध्यात्वा घटाग्रे मूलं जप्त्वा देवा
ग्रे कवचादिपाठं कृत्वा देव्यै जपं समर्प्य
होमं कुर्यात् ब्राह्मणान् भोजयित्वा दे

इति

ह्रीं विसर्जयेदिति विधिः श्री कालरात्रिपूजा
पद्धति समाप्तः अस्य श्रीमहागौरीमंत्र
स्य कालभैरव ऋषिः अनुष्टुप् छंदः श्रीमहा
गौरी देवता ॐ ऐं बीजं ॐ सौः शक्तिः ॐ ॐ कील
कं ॐ ग्लूं दिग्बंधनं धर्मार्थकाममोक्षार्थे ज
पे विनियोगः गां हृदयादिन्यासः घटे वाद्य
मातृकासंपूज्य देवीं संपूजयेत् ॐ ऐं सौः
देवि महागौरी एह्येहि सन्निधिं कुरु २
पूजां गृहाण २ ग्लीं ग्लूं फट् स्वाहा स्वावाहनम्
मुद्राप्रदर्शये पाद्यार्घ्याचमनीय गंधपु

द

थ्यादिनिवेद्यचन्नासनंसदनं दत्वापूजयेत् म
ध्येमूलेयमलक्ष्म्यैनमः माहेश्वर्यैनमः महा
चंडायैनमः महाभीमायैनमः महामत्ता
यैनमः महोन्मत्तायैन॰ मधुक्षीवायैनमः म
हाविद्यायैनमः मूलं सप्तधोच्चार्य श्रींऊं
ह्रें सौः गौरि महागौर्यैनमः इतिसप्तधोच्चा
र्य मध्येइतिगंधाक्षतपुष्पधूपादिपूनैवेद्या पु
चमनीयादीन्निवेद्यकुमारीपूजयेत् कु
मारीः पाद्यार्घ्याद्यैरभ्यर्च्य वस्त्राभरणा
निदत्वापायसेनसंतर्प्यघंटावादिये

त्वा देवीं ध्यायेत् उद्यत्कुं: समा ना भांसितांसु
मुकुटां शिवां चतुर्भुजां त्रिनयनां महागौरीभ
जां म्यहं इति ध्यात्वा घटाग्रे यथा शक्त्या मूलं
जपेत् ततः कवचादि पाठं विधाय दशांशेन हो
मं कुर्यात् मूलेन [illegible] तर्पणं मार्जनादि विधा
य मूलेन पुष्पांजलिं दत्वा ब्राह्मणान् भोज
यित्वा मूलेन संहार मुद्रया विसर्जयेत् इति
श्रीमहागौरीपूजापद्धतिः समाप्तः अस्य श्रीदे ३४
वहूतिका मंत्रस्य भैरव ऋषिः अनुष्टुप् छंदः
श्रीदेवहूतिदेवता क्लीं बीजं सौः शक्तिः श्रीं की